# Devaih Kritam Lalitadevi Stotram

# દેવૈઃ કૃતં લલિતાદેવીસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam Lalitadevi Stotram

File name : devaiHkRRitaMlalitAdevIstotram.itx

Category : devii, devI, brahmANDapurANa, stotra, lalitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmANDapurANa | uttarabhAga | lalitA | adhyAya 13/1-28||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 1, 2024

*sanskritdocuments.org*

# દેવૈઃ કૃતં લલિતાદેવીસ્તોત્રમ્

દેવા ઊચુઃ ।
જય દેવિ જગન્માતર્જય દેવિ પરાત્પરે ।
જય કલ્યાણનિલયે જય કામકલાત્મિકે ॥ ૧॥

જયકારિ ચ વામાક્ષિ જય કામાક્ષિ સુન્દરિ ।
જયાખિલસુરારાધ્યે જય કામેશિ માનદે ॥ ૨॥

જય બ્રહ્મમયે દેવિ બ્રહ્માત્મકરસાત્મિકે ।
જય નારાયણિ પરે નન્દિતાશેષવિષ્ટપે ॥ ૩॥

જય શ્રીકણ્ઠદયિતે જય શ્રીલલિતામ્બિકે ।
જય શ્રીવિજયે દેવિ વિજયશ્રીસમૃદ્ધિદે ॥ ૪॥

જાતસ્ય જાયમાનસ્ય ઇષ્ટાપૂર્તસ્ય હેતવે ।
નમસ્તસ્યૈ ત્રિજગતાં પાલયિત્ર્યૈ પરાત્પરે ॥ ૫॥

કલામુહૂર્તકાષ્ઠાહર્માસર્તુશરદાત્મને ।
નમઃ સહસ્રશીર્ષાયૈ સહસ્રમુખલોચને ॥ ૬॥

નમઃ સહસ્રહસ્તાબ્જપાદપઙ્કજશોભિતે ।
અણોરણુતરે દેવિ મહતોઽપિ મહીયસિ ॥ ૭॥

પરાત્પરતરે માતસ્તેજસ્તેજીયસામપિ ।
અતલં તુ ભવેત્પાદૌ વિતલં જાનુની તવ ॥ ૮॥

રસાતલં કટીદેશઃ કુક્ષિસ્તે ધરણી ભવેત્ ।
હૃદયં તુ ભુવર્લોકઃ સ્વસ્તે મુખમુદાહૃતમ્ ॥ ૯॥

દૃશશ્ચન્દ્રાર્કદહના દિશસ્તે બાહવોઽમ્બિકે ।
મરુતસ્તુ તવોચ્છ્વાસા વાચસ્તે શ્રુતયોઽખિલાઃ ॥ ૧૦॥

ક્રીડા તે લોકરચના સખા તે ચિન્મયઃ શિવઃ ।

આહારસ્તે સદાનન્દો વાસસ્તે હૃદયે સતામ્ ॥ ૧૧॥

દૃશ્યાદૃશ્યસ્વરૂપાણિ રૂપાણિ ભુવનાનિ તે ।
શિરોરુહા ઘનાસ્તે તુ તારકાઃ કુસુમાનિ તે ॥ ૧૨॥

ધર્માદ્યા બાહવસ્તે સ્યુરધર્માદ્યાયુધાનિ તે ।
યમાશ્ચ નિયમાશ્ચૈવ કરપાદરુહાસ્તથા ॥ ૧૩॥

સ્તનૌ સ્વાહાસ્વધાકારૌ લોકોજ્જીવનકારકૌ ।
પ્રાણાયામસ્તુ તે નાસા રસના તે સરસ્વતી ॥ ૧૪॥

પ્રત્યાહારસ્ત્વિન્દ્રિયાણિ ધ્યાનં તે ધીસ્તુ સત્તમા ।
મનસ્તે ધારણાશક્તિર્હૃદયં તે સમાધિકઃ ॥ ૧૫॥

મહીરુહાસ્તેઽઙ્ગરુહાઃ પ્રભાતં વસનં તવ ।
ભૂતં ભવ્યં ભવિષ્યચ્ચ નિત્યં ચ તવ વિગ્રહઃ ॥ ૧૬॥

યજ્ઞરૂપા જગદ્ધાત્રી વિશ્વરૂપા ચ પાવની ।
આદૌ યા તુ દયાભૂતા સસર્જ નિખિલાઃ પ્રજાઃ ॥ ૧૭॥

હૃદયસ્થાપિ લોકાનામદૃશ્યા મોહનાત્મિકા ॥ ૧૮॥

નામરૂપવિભાગં ચ યા કરોતિ સ્વલીલયા ।
તાન્યધિષ્ઠાય તિષ્ઠન્તી તેષ્વસક્તાર્થકામદા ।
નમસ્તસ્યૈ મહાદેવ્યૈ સર્વશક્ત્યૈ નમો નમઃ ॥ ૧૯॥

યદાજ્ઞયા પ્રવર્તન્તે વહ્નિસૂર્યેન્દુમારુતાઃ ।
પૃથિવ્યાદીનિ ભૂતાનિ તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૨૦॥

યા સસર્જાદિધાતારં સર્ગાદાવાદિભૂરિદમ્ ।
દધાર સ્વયમેવૈકા તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૨૧॥

યથા ધૃતા તુ ધરિણી યયાકાશમમેયયા ।
યસ્યામુદેતિ સવિતા તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૨૨॥

યત્રોદેતિ જગત્કૃત્સ્નં યત્ર તિષ્ઠતિ નિર્ભરમ્ ।
યત્રાન્તમેતિ કાલે તુ તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૨૩॥

નમો નમસ્તે રજસે ભવાયૈ નમો નમઃ સાત્ત્વિકસંસ્થિતાયૈ ।
નમો નમસ્તે તમસે હરાયૈ નમો નમો નિર્ગુણતઃ શિવાયૈ ॥ ૨૪॥

નમો નમસ્તે જગદેકમાત્રે નમો નમસ્તે જગદેકપિત્રે ।
નમો નમસ્તેઽખિલરૂપતન્ત્રે નમો નમસ્તેઽખિલયન્ત્રરૂપે ॥ ૨૫॥

નમો નમો લોકગુરુપ્રધાને નમો નમસ્તેઽખિલવાગ્વિભૂત્યૈ ।
નમોઽસ્તુ લક્ષ્મ્યૈ જગદેકતુષ્ટ્યૈ નમો નમઃ શામ્ભવિ સર્વશક્ત્યૈ ॥ ૨૬॥

અનાદિમધ્યાન્તમપાઞ્ચભૌતિકં હ્યવાઙ્મનોગમ્યમતર્ક્યવૈભવમ્ ।
અરૂપમદ્વન્દ્વમદૃષ્ટગોચરં પ્રભાવમગ્ર્યં કથમમ્બ વર્ણયે ॥ ૨૭॥

પ્રસીદ વિશ્વેશ્વરિ વિશ્વવન્દિતે પ્રસીદ વિદ્યેશ્વરિ વેદરૂપિણિ ।
પ્રસીદ માયામયિ મન્ત્રવિગ્રહે પ્રસીદ સર્વેશ્વરિ સર્વરૂપિણિ ॥ ૨૮॥

ઇતિ સ્તુત્વા મહાદેવીં દેવાઃ સર્વે સવાસવાઃ ।
ભૂયો ભૂયો નમસ્કૃત્ય શરણં જગમુરઞ્જસા ॥ ૨૯॥

તતઃ પ્રસન્ના સા દેવી પ્રણતં વીક્ષ્ય વાસવમ્ ।
વરેણ ચ્છન્દયામાસ વરદાખિલદેહિનામ્ ॥ ૩૦॥

ઇતિ બ્રહ્માણ્ડપુરાણે ઉત્તરભાગે ત્રયોદશાધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં લલિતાદેવીસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્માણ્ડપુરાણ । ઉત્તરભાગ । લલિતા । અધ્યાય ૧૩/૧-૨૮॥

brahmANDapurANa . uttarabhAga . lalitA . adhyAya 13/1-28..

Proofread by PSA Easwaran

*Devaih Kritam Lalitadevi Stotram*

pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*